Reg. No. | | | | | | | | |

# BCMSKL 253

**Credit Based IV Semester B.Com. Examination, September 2022**
**(2019 – 20 & Earlier Batches)**
**SANSKRIT LANGUAGE**

Time : 3 Hours                                                                                    Max. Marks : 80

***सूचना :*** *यत्र **संस्कृत**भाषया लिखत इति वर्तते तत्र **संस्कृते**नैव उत्तरं लिखत। अन्यत्र **संस्कृत**भाषया, **आंग्ल**भाषया, **कन्नड**भाषया वा उत्तर लिखत।*

1. **द्वयोः कर्णाटक**भाषया, **आंग्ल**भाषया वा अनुवादं कृत्वा विवृणुत। **(2×5=10)**

1. 1) 'वणिजां कर्म वाणिज्यम्। वार्तायां नित्ययुक्तः वैश्यः ' इति निर्दिशति मनुः। युक्तं अर्थसाधनं वार्ता। वार्तया सम्पन्नः निर्भयं सुखमश्नुते इति प्रतिपादितवान् वर्तते वाल्मीकिः। ' वार्ता समृद्धयो हि सर्वाः समृद्धयो राज्ञाम् ' इत्यभिप्रैति सोमदेवः नीतिसूत्रे। 'कृषिपाशुपाल्ये वाणिज्या च वार्ता' इत्युक्तवान् वर्तते कौटिल्यः अर्थशास्त्रे। वार्ता नाम कुसीदं कृषिः गोरक्षा वाणिज्यञ्च' इत्युक्तिः वर्तते। अत्रापि अतिरस्कृतः अर्थलाभः। उपायानां च सर्वेषां उपायः पण्यसग्रहः इत्युक्तं अस्ति विष्णुशर्मणा पञ्चतन्त्रे।

1. 2) प्राणमोहमपि परित्यज्य भर्तृहितसंरक्षणं पत्नीधर्मः। तदर्थं भार्या इष्यते तदपि भवता प्राप्त एव, धर्मप्रजासंम्प्राप्तिः विवाहफलं श्रुतम्। एकः कुमारः एका कन्या इति विवाहफलं परिपूरितम्। सुतयोः द्वयोरपि संरक्षणं इदानीं अत्यावश्यम्। तच्च त्वया साध्यम्। न तु मया। बकस्य कृते भवन्तं यदि मुञ्चेयं विधवा, अनाथा, बालपुत्रद्वयोपेता सन्मार्गे कथं वा गमिष्यामि ? अतः न भवन्तं सर्वथा मोक्तुमर्हे बकसमीपं अहं गच्छामि इति ब्राह्मणी वदति।।

1. 3) परन्तु तत्र यमो नासीत्। तस्मात् स द्वार्येव त्रीणि दिनानि यापयामास। व्यतीतेषु त्रिषु दिनेषु समागतेन यमेन बालोऽयं अदर्शि। उपोषणेन तस्य आननं म्लानमासीत्। तथापि तस्य नयनयोः श्रद्धा स्पष्टं दृश्यते स्म। अतिथिं तं बह्मचारिणं यमो यथाविधि पूजयामास। तस्य श्रद्धया तुष्टो यमः 'वत्स, त्रीणि दिनानि मां प्रतीक्षमाणस्त्वं व्रतस्थ आसीः। तस्माद् दिनसंख्यानुगुणं वरत्रयं दीयते मया। तत् कथय ते मनोरथान् ' इत्यवादीत्।

2. **पञ्चानां** वाक्यविवरणं **कर्णाटक**भाषया, **आंग्ल**भाषया, **संस्कृत**भाषया वा लिखत। **(5×3=15)**

2. 1) वणिजश्च नरव्याघ्र बहुमाया भवन्त्युत।

2. 2) कृषिः वाणिज्यं च राष्ट्रस्य नेत्रद्वयमिव।

P.T.O.

2. 3) बलसंरक्षणात् कोशराष्ट्रवृद्धिः अरिक्षयः।

2. 4) सर्वशून्या दरिद्रता।

2. 5) मम नाम जबाला तव च सत्यकामः।

2. 6) वयं पञ्चाधिकं शतम्।

2. 7) त्वां यमाय ददामि।

2. 8) कर्तव्यः धर्मसङ्ग्रहः।

3. **द्वयोः** प्रबन्धात्मकं उत्तरं **कर्णाटक**भाषया, **आंग्ल**भाषया, **संस्कृत**भाषया वा लिखत। **(2×8=16)**

3. 1) 'लोकमर्यादायै राजधर्मव्यवस्था' इमं विषयं विशदयत।

3. 2) कौटुम्बिकसमस्यानिर्वहणं महाभारते कथं चित्रितम् ? लिखत।

3. 3) छान्दोग्योपनिषदः सत्यकामकथांवर्णयत।

3. 4) न्यायवादी बिडालः– कथासारांशं लिखत।

4. **द्वयोः कर्णाटक**भाषया, **आंग्ल**भाषया, **संस्कृत**भाषया वा टिप्पणीं रचयत। **(2×6=12)**

4. 1) अर्थोपायाः।

4. 2) धनमहिमा।

4. 3) महाभारतम्।

4. 4) अरण्यमार्जारः तीक्ष्णदंष्ट्रः।

5. अधोदत्तेषु न्याय**द्वयं कर्णाटक**भाषया, **आंग्ल**भाषया, **संस्कृत**भाषया वा विवृणुत। **(2×4=8)**

5. 1) गतानुगतिको लोकः न लोकः पारमार्थिकः न्यायः।

5. 2) बकबन्धनन्यायः।

5. 3) काकदधिघातक न्यायः।

5. 4) भिक्षुपादप्रसारण न्यायः।

6. अधोनिर्दिष्टेषु **षड्वा**क्यानि पाठ्यधारेण पूरयत। **(1×6=6)**

6. 1) शरीरमाद्यं खलु धर्मसाधनम् इति ______ वचनम् (कालिदासस्य, वाग्भटस्य, भासस्य)

6. 2) उद्योगिनं पुरुषसिंहम् उपैति ______ (मृगी, लक्ष्मीः, पत्नी)

6. 3) कोशो हि महीपतीनां ______ (सम्पत्, सामर्थ्यम्, जीवितम्)

6. 4) ______ हि लोके पुरुषस्य बन्धुः।(पुत्रो, पत्नी, अर्थो)

6. 5) महाभारतस्य ______ पर्वणि बकवधप्रसङ्गः अस्ति। (आदि, सभा, वन)

6. 6) ______ ईक्षणेन प्राप्तमिदं ज्ञानम् (वनस्य, गवाम्, सृष्टेः)

6. 7) कपिञ्जलः नाम ______ कोटरे वसति। (काकः, पिकः, चटकः)

6. 8) कोटरे ______ नाम शशकः आगत्य प्रविष्टः। (शीघ्रगः, नभागः, धावकः)

7. संयोजयत। **(5×1=5)**

| | | |
|---|---|---|
| 7. 1) | वणिक् | पुण्याय |
| 7. 2) | महाभारतम् | गन्धर्वः |
| 7. 3) | वर्धमानकः | वाजश्रवसः यज्ञः |
| 7. 4) | परोपकारः | वैश्यः |
| 7. 5) | विश्वजित् | पञ्चतन्त्रम् |
| | | पञ्चमो वेदः |

8. अधोदत्तेषु **एकं** पत्रं **संस्कृतेन** लिखत। **(1×8=8)**

8. 1) गीता पुस्तकालयः भाग्यनगरं, तस्मै निर्देशकाय पुस्तकार्थं संयुक्तपत्रेण सह एकं आदेशपत्रं संस्कृतेन लिखत।

(ऋग्वेदः 10 पुस्तकानि, यजुर्वेदः 10 पुस्तकानि, सामवेदः 5 पुस्तकानि, अथर्ववेदः 5 पुस्तकानि)

8. 2) महाराज–विद्यालयः मैसूरु नगरम्, अस्मिन् विद्यालये संस्कृताध्यापनवृत्तिम् अपेक्ष्य संचालकाय स्वविवरण साहितं संस्कृतेन अभ्यर्थनापत्रं लिखत।